च परा सौभाग्यकरणी ख्याता नानंगत्रयोदशी तस्याव्रतं महादेव ममापि कथय प्रभो कस्मि
न्मासे च कर्त्तव्यं संपूर्णं च कथं भवेत् पूज्यानि कानि नामानि विधिना केन वै मृड दुर्भ
गानां च नारीणां सौभाग्यकरणं परं वंध्यानां पुत्रकरणं धनधान्यविवर्द्धनं एत
द्व्रतं महादेव प्रसादाद्वक्तुमर्हसि ईश्व० कथयामि न संदेहो महापुण्यं महाफलं ची
र्णेन येन देवेशि सर्वं संपद्यते सुखं नराणां चैव नारीणां विधानं शृणु यत्नतः हेमंते हि
ऽस्मिन्मासि मार्गशिरे शुभे शुक्लायां त्रयोदश्यामुपवासं तु कारयेत् मल्लिकादंत
धावनं पूजा चैव न वेनतु नाहं देवार्घदानं च नैवेद्यं फेणिकास्तथा गंधैः पुष्पैस्तथा
धूपैरर्च्चयेच्च यथाविधि अदत्तिश्च फलैश्चैव रोकाग्रहृदयः स्थितः सम्यक्जित्तें
द्रियो भूत्वा अनंगं हृदि कल्पयेत् पश्चात्प्रदक्षिणीकृत्य अर्घ्यं चैव निवेदयेत्

राम २५३

गेला

तत्रचोक्तेनमंत्रेणव्रतंसंकल्पयेद्बुधः ततस्तु लोहितेभानौ स्नात्वा सनियमो व्रती पूजास्थानं ततो गत्वा प्रदोषे शि
वमर्चयेत् पूजामंत्रः ४४

नफलसिद्धये ईश्वरउवाच यदात्रयोदशीशुक्ला मंदवारेण संयुता आरब्धव्यं व्रतं
तत्र संतानफलसिद्धये कृष्णा मादनार्थेन् भौमवारेण संयुता सौभाग्यस्त्रीस
मृद्ध्यर्थं शुक्रवारेण संयुता आयुरारोग्यसिद्ध्यर्थं भानुवारेण संयुता एवं वत्स
रपर्यंतं प्रतिपदे त्रयोदशी प्रदोषे शिवमभ्यर्च्य नक्तं भोदर्पसिशंकर भवाय नमः म
हादेवाय० रुद्रेभ्यः नीलकंठाय० शशिमौलिने० उग्राय० भीमाय० ईशानाय० म
सयावकंच वाद्यैः षोडशोपचारपूजाः प्रदक्षिणा नमस्कारां श्चाष्ट कुर्यात् यथाभवान्समस्ता
नैवेद्यंभक्ष नां पञ्चनां पापशामोचकः तथाव्रतेन संतुष्टः पुत्रं देहि सुलक्षणं ऋण रोगादिदारि
द्यासतथैव द्युपाप तुःशमृत्यवः भयशोकमनस्तापानश्यंतुममसर्वदा निवेद्यकर्मजानंतुद
च दत्वास द्याद्विजान्सारतः दक्षिणां ब्राह्मणेभ्यश्च ततो मौनं विसर्जयेत् एवं संवत्सरं कु
तुश्रद्धेवाग्रेयात्रयोदश्यामिदंव्रतं इदमपि स्कांदोक्तमेव अथानंगत्रयोदशीव्रतं श्रीकृ०
प्रार्थयेच्चततोव्रती
पृथिव्यायानितीर्थानि सागरादीनितानिच
अनंगमाश्रित्यतिष्ठंतिप्रदोषे गोवृषस्तु

४५ ६४३

हि हि ... (margin, vertical text)

व्र० २५४

श्वरस्तथा ॐ नमो योगेश्वराय योगनंतुनिवासिने गृहाणार्घ्यं मया दत्तं योगेश्वर नमोस्तु ते ६
त्वर्घ्यं मौक्तिकं प्राशयेत्प्रातो वाजपेय फलंलभेत् सर्वाभिप्राय सिद्ध्यर्थं वीरेश्वं ॐ वीरे नामरजयेत् ५२
श्वर वीरभद्र उमाकांत सुरेश्वर हिमपधानिवासी त्वं गृहाणार्घ्यं महीश्वर सीतातुल्यामु
वेत्नारीकं कोलंतुप्राशयेन्निशि चैत्रस्यैव तु मासस्य पन वमल्ली दंतधावनं दमनेनार्
येद्देवं तथार्घ्यं च प्रकल्पयेत् नैवेद्यं खर्जूकान्दद्यात् विश्वरूपंतु पूजयेत् नमस्ते वि ५३
श्वरूपाय सुरूपाय महात्मने गृहाणार्घ्यं मया दत्तं विश्वरूप नमोस्तु ते उमातुल्याम वे
त्नारीकर्पूरं प्राशयेन्निशि वैशाखस्य तु मासस्य पामार्गदन्तधावनं पूजा च मल्लिका
पुष्पैस्तु तमर्घ्यं तु दापयेत् नैवेद्यं वटकं दद्यान्महादेवं तु पूजयेत् नमस्ते महारूपाय
सर्वविज्ञानरूपिणे गृहाणार्घ्यं मया दत्तं महारूप नमोस्तु ते ततः शुद्धमना भूत्वा जा राम
तीफलं प्राशयेन्निशि अश्वमेधस्य यज्ञस्य फलमप्सरोगणं लभेत् ज्येष्ठस्यैव तु मासस्य २५४

प्रा२

नमस्कुर्यादनंगंच मंत्रेणानेन मानिनि नमोस्त्वनंगदेवाय सर्वसंघनिवासिने हृद्
स्थिस्थाय नित्याय सूक्ष्माय परमेष्ठिने स्वर्गेचैव तु पाताले मर्त्यलोके तथैव च स
र्वव्यापी त्वनंगत्वं गृहाणार्घं नमोस्तु ते इत्यर्घं पूजयेत्तस्य स्यचित्तेन मधु च प्राशये
न्निशि रंभा तुल्या भवन्नारी सौभाग्यमतुलं भवेत् नश्यंति सर्वपापानि अन्यजन्म
कृतानि च लावण्यमतुलं चैव रूपैश्वर्यसमन्वितं अश्वमेधस्य यज्ञस्य फलं प्रा
प्नोति मानवः योषसैंकवर्तिकाः स्निग्धा नैवेद्यं च प्रकल्पयेत् उपोष्य पूजयेद्देव
मक्त्यानाथेश्वरं प्रिये ॐ नमो नाथेश्वराय ईश्वराय नमो नमः नमस्ते भुवनेशाय
गृहाणार्घं नमोस्तु ते इत्यर्घः व्रतस्य स्वस्य चित्तेन चंदनं प्राशयेन्निशि सर्वपा
पविशुद्धात्मा सौभाग्यमतुलं लभेत् माघस्यैव तु मासस्य विष्णुक्रांता दंतधाव
नं कुंदपुष्पैः समभ्यर्च्य स्वर्चयेद्बीजपूरकैः नैवेद्यं शार्करां दद्यात् देवो योगे

व्रतमासस्य
प्रोक्तं वरं दं
नंधावनम
जातीपुष्पैः
पूजनं तस्या
द्वादसेनार्घमेवच अप्रो ४-५

कृते सौत्रामण्याख्ययज्ञस्य फलमष्टगुणंलभेत् भाद्रस्य वरमासस्य त्र्यंको नं दंतधाव
नं अर्चयेच्च पर्कैः पुष्पैर्नैवेद्यं घृतपूरिकां अर्घ्यं पूगफलं दद्यात्सद्योजातं तु पूजयेत्
ततः स्वस्थमना भूत्वा अगरुं प्राशयेन्निशि त्रिदशेश्वरदेवाय सद्योजाताय ते नमः
गृहाणार्घं मया दत्तं सद्योजात नमोस्तु ते दशानामश्वमेधानां फलं प्राप्नोति मानवः
आश्विनस्य तु मासस्य कंकतीदंतधावनं अर्चयेत्करवीरैस्तु अर्घ्यं कर्कटिकाफलम्
दद्यात्त्रिदशाधिपतिर्नैवेद्यं शुभ्रमंडिका प्राशयेत्कनकं तोयं निशि देवं प्रपूजये
त् ॐ त्रिदशाधिपदेवेश उमाकांत महेश्वर त्रिधारूपमनस्त्वं हि अर्घ्यो मे प्रति
गृह्यतां चातुर्मासस्य यज्ञस्य फलं दशगुणं लभेत् कार्त्तिकस्य तु मासस्य कर्दम्बं द
न्तधावनं रक्तोत्पलैः पूजनं च कूष्मांडार्घं प्रदापयेत् नैवेद्यं घृतपूरिकां दद्यात्पूजये
ज्जगदीश्वरम् प्राशयेन्मदनफलं निशि चैवं समाहितः नमस्ते जगदीशाय तापि

सहदैं दंतधावनं पूजा वकुलपुष्पैस्तु श्रीफलेनार्घ्यकल्पना नैवेद्यं मंडकान्दद्यात्त
वं गंधं प्राशयेन्निशि प्रद्युम्नं पूजयेद्देवं सर्वपापप्रणाशनं नमस्ते पशुपतये प्रद्युम्नभु
वनेश्वर गृहाणार्घ्यं मया दत्तं प्रद्युम्न परमेश्वर सुवर्णशतदानस्य फलं प्राप्नोत्यसंश
मेत्र आषाढस्य तु मासस्य नारंगो दंतधावनं कदंबैः पूजयेद्देवं नालिकेरार्घक
ल्पना नैवेद्यैर्विविधैर्नक्तं उमापतिं प्रपूजयेत् प्राशयेत्तिलबीजानि शिवस्व
स्थेन चेतसा उमापते महाबाहो कामदहनाय ते नमः गृहाणार्घ्यं चंद्रमौले उ
माकांत नमोस्तु ते वाजपेयस्य यज्ञस्य फलमाप्नोति मानवः श्रावणस्य तु मा
सस्य जातीमिहं दंतधावनं पूजयेत्पद्मपुष्पैस्तु जंबूकेरर्घकल्पना नैवेद्यं क्षी
रस्य दद्यात् शूलपाणिं तु पूजयेत् प्राशयेद्धं घृतं यं तु रात्रौ चैव समाहितः ॐ
नमः शक्तिधराय भक्तिभावनशूलिने गृहाणार्घ्यं मया दत्तं शूलपाणे नमो

व्र० २५६

रः ६ स्र० एवंकृत्वाप्रयत्नेनदंपतीचैवपूजयेत् तयोश्चभोजनंदद्याद्दंपत्योःपरितोष कं अनेनविधिनातुयाप्सहंयुक्तस्त्वयानघ तेभ्योदत्तंचयत्किंचिदक्षयंनात्र संशयः आचार्यमग्रतःकृत्वातस्यादेशंतुदापयेत् तत्राचार्यसमंतीर्थंनत्राचा र्यसमंतपः ॥ तस्माहंकायमास्थायधर्मसिद्धिंनयेध्रुवं तेनैवाचार्यदानेन सर्वंभवतिवादतयं एतद्व्रतोत्तमंश्रेष्ठंगुह्याद्गुह्यतरंपरं एतत्समर्थोन्सुतान्सि द्धिमवैधव्यंचयच्छति रूपंधनंधान्यमायुरारोग्यंचप्रदापयेत् इदंव्रतमंचसौ भाग्यंवर्द्धयेच्चवरानने त्रयोदशीव्रतान्नास्तिसौभाग्यकरणंपरमितिभवि ष्योत्तरेनंगत्रयोदशीव्रतं इतिश्रीभट्टनीलकंठात्मजभट्टशंकरकृतौव्रता र्केत्रयोदशीव्रतानि ॥ ॥ ॥

राम २५६

नेऋलपालाये गृहाणार्घ्यं महेशाय जगदीशनमोस्तुते अर्घमंत्रः पूजांतेन्नागरं कु
र्यात्क्रीतनवाद्यमहोत्सवैः अर्द्धनारीश्वरं कुर्यात्सौवर्णं रौप्यमेव च वस्त्रयुग्मेन संवे
ष्ट्य शय्यायां विनिवेशयेत् एवं कृत्वा तु देवेशं नत्र शोभां तु कारयेत् श्वेतपुष्पैस्सु
संपूज्य श्वेतचंदनचर्चितं धूपं सुगंधं संदीप्य सवत्सां गां प्रदापयेत् श्वेतवस्त्र
परीधानां घंटाभरणभूषितां सुसूक्ष्मवस्त्रयुगलमाचार्याय निवेदयेत् तथैव द
क्षिणां दद्यादासनं चैव पादुकां छत्रं च मुद्रिकाश्चैव कंकणं चैव भूषणं स्वद्रु
दिव्या प्रदेया तु तूल्याच्छादनसंयुता गृहोपस्करसंयुक्ता भक्तियुक्तेन चेतसा
तत्रोपवेश्य पश्चादाचार्यमुपवासव्रती ततः पादौ मूर्द्धि समारोप्य प्रणिपत्य वचो
वदेत् भगवन्त्वत्प्रसादेन व्रतं संपूर्णतां मम एवमस्त्विति स ब्रूयात्तवत्तुष्टोस्तु शंक

कश्यपं हत्वा देवदेवं जगद्गुरुं सुखासीनं तदुत्संगे शांतकोपं रमापतिं प्रल्हादो ज्ञानि
नां श्रेष्ठः पालयन्राज्यमुत्तमं एकाकी च तदुत्संगे प्रियं वचनमब्रवीत् प्रल्हाद उ
वाच नमस्ते भगवन्विष्णो नृसिंहरूपिणे नमः त्वद्भक्तोऽहं सुरेशो कत्वां पृच्छामि त
त्वतः स्वामिन्त्वयि मम माभिन्ना भक्तिर्जाता त्वनेकधा कथं च ते प्रियो जातः कार
णं वद मे प्रभो श्रीनृसिंह उवाच कथयामि महाप्राज्ञ शृणुष्वैकाग्रमानसः भ
क्तेर्यत्कारणं वत्स प्रियत्वस्य च कारणं पुरा कालेऽप्यभूद्विप्रः किंतु त्वनाप्यधीत
वान् नाहं तैर्वासुदेवेऽहि वेश्यासंसक्तमानसः तस्मिन्जाते न चैव तत्वं चकार
सुकृतं कियत् कृत्का तु मद्व्रतं चैकं वेश्यासंगतिलालसः तद्व्रतस्य प्रभावेण
भक्तिर्जाता तवानघ प्रल्हाद० कस्य पुत्रस्य किं व्रतं वेश्यायां वर्तमानेन कथं
तच्च कृतं मया येन तद्विप्रमाहात्म्यं वक्तुमर्हसि सांप्रतं श्रीनृसिं० पुरा वं०
श्रीनृसिंहोच्यतां तावत् २४

अथ चतुर्दशीव्रतानि तत्र वैशाखशुक्लचतुर्दश्यां नृसिंहचतुर्दशीव्रतं तच्च प्रदोषव्यापिन्यां
कार्यं तदुक्तं हेमाद्रौ नृसिंहपुराणे वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे मज्जन्मसं
भवं पुण्यं व्रतं पापप्रणाशनं वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारणमिति स्कांदे पि वै०
शाखस्य चतुर्दश्यां सोमवारे निलर्क्षके अवतारो नृसिंहस्य प्रदोषसमये द्विजा इति
अनिलर्क्षं स्वाती दिनद्वये तद्व्याप्तावेकदेशसमव्याप्तौ परा अनंगेन समायुक्ता न
सोपोष्या चतुर्दशी धनापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेदिति तत्रैव निषेधात् नृ
सिंहपुराणे चतुर्दशी न संग्राह्या त्रयोदश्यां तु वेध्यवैः स्वातीयुक्तापि नोपोष्या हन
ग सहिता यदि अनंगत्रयोदशी इदं च व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च
स्कांदे विज्ञाय मद्दिनं यस्तु लंघयेत्पापकृन्नरः स याति नरकं घोरं यावच्चंद्रदिवा
करौ मम संतुष्टिकारणमिति फलश्रवणाच्च अथ कथा सूत उवाच हिरण्य

अनंगत्र
योदशी ४५

वृ० २५८

मोदंते दिवि देवताः सत्यार्थं पुरा ब्रह्मा चक्रे हैतत्तदुत्तमं तद्व्रतस्य प्रभावेन निर्मितं सचराचरं ईश्वरेण पुराची र्णं वधार्थं त्रिपुरस्य च महाप्राज्ञेन विहितं व्रतमेतन्महाफलम् एतद्व्रतप्रभावेण सर्वे सिद्धिमुपागताः वेश्यापि मत्प्रिया जाता त्रैलोक्ये सुखकारिणी ईदृशं मद्व्रतं वत्स त्रैलोक्ये सुविश्रुतं कलहेन विलासिन्या व्रतमेतदुपास्थितं प्रल्हादतेन तेन भक्तिर्मयि जाता सनुत्तमा धृतं याच विलासिन्या ज्ञात्वा व्रतमिदं महत् कलहस्य कृतो पि न मद्व्रतं यत्कृतं भवेत् सा वेश्या नु वरा जाता भुक्त्वा भोगाननेकशः भुक्त्वा कर्मविलीना तत्त्वं प्रल्हाद विशास्वमां कार्यार्थं च भवाना सेमच्छरीरपृथक्त्वा या विधाय सर्वकार्याणि शीघ्रं चैव गमिष्यसि य इदं व्रतमवश्यं प्रकरिष्यति मानवाः न तेषां पुनरावृत्तिर्मत्तः कल्पशतैरपि अपुत्रो लभते पुत्रान्धनकामो धनं तथा ज्ञानी च मम भक्तश्च दिव्यं सौख्यं भवेत्ततः स्त्रियो वा पुरुषाश्चापि कुर्व

राम २५८

तीपुरे ह्यासीद्ब्राह्मणो वेदपारगः तस्यनामसुशर्मेतिवहुलोकेषुविश्रुतः नित्यंहो
मक्रियांचैवविदधातिनरोत्तमः ब्राह्मणक्रियासुनियतं सर्वासुकिलतत्परः अग्नि
ष्टोमादिभिर्यज्ञैरिष्टांसर्वैसुरोत्तमाः तस्यभार्यासुशीलाभूद्विख्याताभुवनत्रये प
तिव्रतासदाचारापतिभक्तिपरायणा जज्ञिरेस्यांसुताः पंचतस्माद्विजवरात्तथा स
दाचाराः सुविद्वांसः पितृभक्तिपरायणाः तेषांमध्येकनिष्ठस्तु वेश्यासंगतितत्परः
तथापिविद्यमानेनसुरापानंसुपातकं सुवर्णंचाप्यपहृतंचौरैः सार्द्धंत्वयावहु वि
लासिन्याप्रसंगेनसमाचीर्णमथंवहु विलासिनीवेश्या एकदातद्गृहे ह्यासीन्म
हाकलिस्त्वयासह तेनकलहभावेनव्रतमेतत्त्वयाकृतं अज्ञानात्तद्व्रतंचैकेव्र
तानामुत्तमंव्रतं तस्याविरहयोगेनरात्रौजागरणंकृतं वेश्यायावत्तुभंकिंचित्
त्वज्ञातंनत्वयासमं रात्रौजागरणंचीर्णंत्यक्तंभोज्यमनेकधा व्रतेनानेनचीर्णेन

व्र०
२५९

ध्या पुण्यसौभाग्ययोगेनलभ्यतेदैवयोगतः योभैरैनैतुसंयुक्तंहत्वाकोटिविनाशनं
एतदन्यतरेयोगेनहिनंपापनाशनं केवलेपिचकर्त्तव्यंतद्दिनेव्रतमुत्तमं अन्यथा
नरकंयातियावच्चंद्रदिवाकरौ यथायथाप्रवृत्तिःस्यात्पातकस्यकलौयुगे तथात
थाव्रतप्रयंतिसर्वेधर्मानसंशयः तद्व्रतस्यप्रभावेनमतिर्नस्याद्दुरात्मनां विचार्यै
त्यंव्रकर्त्तव्यंमाधवेमासिमद्व्रतं नियमश्चप्रकर्त्तव्योदन्तधावनपूर्वकं श्रीनृसिंह
महोदग्रदयांकृत्वाममोपरि अद्याहंतेविधास्यामिव्रतंनिर्विघ्नतांनय इतिनियम
मंत्रः व्रतस्थेननकर्त्तव्यासंगतिःपापिभिःसह मिथ्यालापोनकर्त्तव्यःसमग्रफल
कांक्षिभिः स्त्रीभिर्दुष्टैश्चआलापान्व्रतस्थोनैवकारयेत् स्मर्त्तव्यंमेमहारूपंतद्दि
नेसकलेक्रमे ततोमध्यान्ह [illegible] वेलायांनद्यादेविमलेजले गृहेवादेवखाते
वातडागेविमलेक्रमे वैदिकेनचमंत्रेणस्नानंकृत्वाविचक्षणः मृत्तिकागोमये

राम
२५९

तिव्रतमुत्तमं तेभ्योददाम्यहं सोत्वं भक्तिभक्तिसमन्वितं वदनोक्तेनकिंवत्सव्रतस्य
फलमुत्तमं प्रश्नो० व्रतस्यास्यफलं साधुत्वयि मे भक्तिकारणं स्वामिन्नुज्ञातं वि
शेषेण त्वत्तः पापनिकृंतनं अधुनाश्रोतुमिच्छामि व्रतस्यास्य विधिं परं कस्मिन्मा
से भवेदेतत्कस्मिंश्चवासरे प्रभो एतद्विस्तरतो देववक्तुमर्हसि सांप्रतं विधिनाये
नैवस्वामिन्समग्रफलभुग्भवेत् ममोपरिकृपां कृत्वा ब्रूहि त्वं सकलं प्रभो श्रीन
सिं० साधुसाधुमहाभाग व्रतस्यास्य विधिं परं सर्वं कथयतो मे द्य त्वमेकाग्रमनाः शृ
णु वैशाखस्य शुक्लपक्षे तु चतुर्दश्यां समाचरेत् मज्जन्मसंभवं पुण्यं व्रतं पापप्रणा
शनं वर्षे वर्षे तु कर्त्तव्यं मम संतुष्टिकारकं महापुण्यमिदं श्रेष्ठं मानुषैर्भवभीरुभिः
तेनैव क्रियमाणेन सहस्रद्वादशीफलं जायते मन्मुखाद्धि मानुषाणां महा
त्मनां स्वातिनक्षत्रयोगेन शनिवारेण संयुता सिद्धियोगस्य योगे च वणिजे करणे न

व्र०
२५०

श्रीतलं दिव्यं चंदनं कुंकुममिश्रितं ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर चंदनमंत्रः का
लोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो पूजयामि नृसिंह त्वां लक्ष्म्या सह नमो
स्तुते पुष्पमंत्रः कृष्णागरुमयं धूपं श्रीनृसिंह जगत्पते तव तुष्ट्यै प्रदास्यामि स
र्वदेव नमोस्तुते धूपमंत्रः सर्वतेजोमयं तेजस्तथा दीपं ददामि ते इति दीपः नै
वेद्यं सौख्यदं चारु भक्ष्यभोज्यसमन्वितं ददामि ते रमाकांत सर्वपापक्षयं कुरु इ
ति नैवेद्यमंत्रः पीतांबर महाबाहो प्रह्लादभयनाशन यथाभूतेनार्घेनेन यथो
क्तफलदो भव इति प्रार्थना रात्रौ जागरणं कार्यं गीतवादित्रनृत्यकैः पुराणा
द्यैश्च श्रोतव्याश्च कथाः शुभाः ततः प्रभातसमये स्नानं कृत्वा जितेंद्रियः पूर्वो
क्तेन विधानेन पूजयेत्तां प्रयत्नतः वैष्णवान्पूजयेन्मंत्रान्मद्गेहे संस्थमानसः
ततो दानानि देयानि वक्ष्यमाणानि चैव हि पात्रेभ्यस्तु द्विजेभ्यो हि शाकदपे

लाभ्रव x ४

राम
२५०

नैवतथाधात्रीफलेनच तिलैश्चसर्वपापघ्नैः स्नानं कृत्वामहात्माभिः परिधायशुचि
वाससोनित्यकर्मसमाचरेत् ततोगृहं समागत्य स्मरन्मांभक्तियोगतः गोमयेन
प्रलिप्याथकुर्याद्दलदलंशुभं कलशंतत्रसंस्थाप्यताम्रंरत्नसमन्वितं तस्यो
परिन्यसेत्पात्रंवंशजंव्रीहिपूरितं हैमीतत्रचमन्मूर्त्तिः स्थाप्यालक्ष्म्यासमेवच
पलेनचतदर्धेनतदर्द्धार्द्धेनवापुनः यथाशक्तितथाकार्यावित्तशाठ्यविवर्ज्जि
तैः पंचामृतेनसंस्नाप्यपूजनंचसमाचरेत् ततोब्राह्मणमाहूयतमाचार्यमलो
लुपं सदाचारसमायुक्तं शांतंदांतंजितेन्द्रियं तेनैवकारयेत्पूजांदृष्ट्वाशास्त्रा
नुसारतः आचार्यवचनाद्धीमान्पूजांकुर्याद्यथाविधि मंडपंकारयेत्तत्रपु
ष्पस्तवकशोभितं रुतुकालोद्भवैः पुष्पैः पूजयेद्यतमानसः उपचारैःषोड
शाभिर्मंत्रैर्वेदोद्भवैस्तथा ततः पौराणिकैर्मंत्रैः पूजनीयोयथाविधि चंदनं

संतोष्य ब्राह्मणांस्तु विसर्जयेत् मध्याह्ने तु समायुक्तो भुंजीत बंधुभिर्न्नरः य इदं शृणु-
याद्भक्त्या व्रतं पापप्रणाशनं तस्य श्रवणमात्रेण ब्रह्महत्यां व्यपोहति पवित्रं परमं
गुह्यं कीर्तयेद्यस्तु मानवः सर्वान्कामानवाप्नोति व्रतस्यास्य फलं लभेत् इति हेमा-
द्रौ नृसिंहपुराणे नृसिंहचतुर्दशीव्रतं अथ भाद्रशुक्लचतुर्दश्यामनंतव्रतं तच्च
त्रिमुहूर्त्तोदयव्यापिन्यां कार्यं मुहूर्त्तमपि चेद्द्वेपौर्णमास्यां चतुर्दशी संपूर्णां तां
विदुस्तस्यां पूजयेद्विष्णुमव्ययम् तिथौ भाद्रपदस्यांते चतुर्दश्यां द्विजोत्तम। पौर्णमा-
स्याः समायोगे व्रतं चानंतकं चरेदिति स्कांदे भविष्योक्तेः मुहूर्त्तेति त्रिमुहूर्त्तप्रशंसा-
परं अत एव माधवः उदये त्रिमुहूर्त्ता तु ग्राह्यानंतव्रते तिथिरिति यद्यपि मध्याह्ने भो-
ज्यवेलायां समुत्तीर्य्य सरित्तटे इत्यादि भविष्यात् मध्याह्नः पूजाकालो भाति तथापि
तत्र पूजाविध्यभावात्तद्व्यापिनी ग्राह्येति इति हेमरूपार्थेवादाद्विष्णुनयानात्रा

जिगीषया सिंहः स्वर्णमयो देवो मम संतोषकारकः गोभूतिलहिरण्यानि देयानि चफ
लेप्सुभिः शय्या सतूलिका देया सप्तधान्यसमन्विता अन्यानि च यथाशक्त्या देया
नि मम तुष्टये वित्तशाठ्यं न कुर्वीत यथोक्तफलकांक्षया ब्राह्मणान्भोजयेत्पश्चात्
[illegible] देयं शक्त्यनुसारतः सर्वेषामेव वर्णानामधिकारोस्ति मे व्रते
मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैः तद्देशे नास्ति दुःखं च दोषश्च मत्प्रसाद
तः मां समुद्धर देवेश दुस्तराद्भवसागरात् पातकार्णवं दुःखांबुवासिभिः जी
वैस्तु परिभूतस्य मोहाद्दुःखगतस्य मे करावलंबनं देहि शेषशायिं जगत्पते श्री
नृसिंह रमाकांत भक्तानां भयनाशन क्षीरांबुधिनिवास त्वं चक्रपाणे जनार्द
न व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव इति प्रार्थनामंत्रः एवं संप्रार्थ्य ततो देवं
विसृज्य च यथाविधि उपहारादिकं सर्वमाचार्याय निवेदयेत् दक्षिणाभिस्तु

तेभ्यो दद्या
च्च दक्षिणां
लिङ्गेनेना
पि कर्तव्य
xx

मत्स्य
[illegible]धि xx

नृ

व्र० २६२

तत्र चाष्टदलेयत्रे पूजयेद्विष्णुमव्ययम् कृत्वा दर्भमयं देवं फणासप्तकमंडितं तस्याग्रतो
दृढं सूत्रं कुंकुमाक्तं सुशोभनं चतुर्दशग्रंथियुतमथ पस्याप्यप्रपूजयेत् ततस्तु मूलमंत्रे
णनमस्कृत्य चतुर्भुजं नवाम्रपल्लवाभासं पिंगभ्रू श्मश्रुलोचनं पीतांबरधरं देवं शं
खचक्रगदाधरं प्रसन्नवदनं विष्णुं विश्वरूपं विचिंतये ध्यानं आगच्छानंतदेवेश तेजो
राशे जगत्पते क्रियमाणां मया पूजां गृहाण सुरसत्तम सहस्रशीर्षेत्यावाहनं ततो
ग्रंथिदेवताः विष्णुरग्निस्तथादित्यः सहस्राक्षः पितामहः इंद्रः पिनाकी विघ्नेशः स्कं
दः सोमस्तथैव च वरुणः पवनः पृथ्वीव सवो ग्रंथिदेवताः नानारत्नसमायुक्तं का
र्तस्वरविभूषितं आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां पुरुष एवेदमित्यासनं गं
गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यतां ए
तावानस्येति पाद्यं अनंतानंतदेवेश अनंतफलदायक अनंतानंतरूपोसि गृहा

राम २६२

कृप्रत्यत्तविधिनोदयव्यापिन्यांतस्यांपूजाविधानादिति अस्मिंश्चव्रतेपूजितच
तुर्द्दशग्रंथियुतदोरकवंधनंप्रधानं संसारगह्वरगुहासुसुखंविहर्त्तुंवांछति
येकुरुकुलोद्भवशुद्धसत्वाः संपूज्यचत्रिभुवनेशमनंतदेवंवध्नंतिदक्षिणएक
रेवरदोरकंते इतितस्यैवफलसंबंधात् अथव्रतविधिः मासपक्षाद्युल्लिख्य
पापनिर्मुक्त्युत्तरसिद्धिपुत्रपौत्रेप्सितभोगधनधान्यपरमगतिप्राप्तयेचतुर्द्दशप्रा
वर्षावध्यनंतव्रतंकरिष्यइतिसंकल्प्य सर्वतोभद्रमंडलंविधायतत्रमंडलेदेव
तात्र्यावाह्यतदुपर्यकंकलशंसंस्थाप्यतत्रफणासप्तकमंडितंदर्भमयंतदग्रेचतु
र्द्दशग्रंथियुतंदोरकमयमनंतंपूजयिष्यइतिसंकल्प्यषोडशोपचारैःकलशोप
रिपूजयेदित्याद्यप्रयोगेद्वितीयापक्षेनुगृहीतानंतव्रतेपूजनंदोरकवंधनंचक
रिष्यइतिसंकल्पयेत् अथानंतपूजा मंडलंसर्वतोभद्रंकृत्वाकुंभंतुविन्यसेत्

व्र०
२५२

माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो मयाहृतानि पुष्पाणि पूजार्थं स्वीकुरु प्रभो
तस्माद्दास्यामि पुष्पं अथांगपूजा अनंताय नमः पादौ संकर्षणाय गुल्फौ कालात्म
ने० जानुनी विश्वरूपाय जंघे विश्वनेत्राय० कटिं मधुसूदनाय० मेढ्रं पद्मनाभाय०
नाभिं परमात्मने० हृदयं श्रीकंठाय० कंठं सर्वास्त्रधारिणे बाहू० हरये मुखं वाच
स्पतये० जिह्वां दामोदराय० दंतान् केशवाय० ललाटं कमललोचनाय शिरः स
र्वात्मने० सर्वांगं वनस्पतिरसो दिव्यो गंधाढ्यो गंध उत्तमः आघ्रेयः सर्वदेवा
नां धूपोयं प्रतिगृह्यताम् यत्नुस्थ्यमिति धूपः आज्यं च वर्त्ति संयुक्तं वह्निना यो
जितं मया दीपं गृहाण देवेश त्रैलोक्य तिमिरापहं ब्राह्मणोस्य इति दीपः अन्नं च
तुर्विधं स्वादु रसैः षड्भिः समन्वितं नानाभक्ष्यसमायुक्तं नैवेद्यं प्रतिगृह्यतां दे — नैवेद्यं गृह्यतां x राम
वं क्लिं मे ह्यचलां कुरु ईप्सितं मे वरं देहि परत्र च परां गतिं चंद्रमा मनस इति नैवे — २५२
द्यं इदं फलं मया देव स्थापितं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि

61

णार्घ्यं नमोऽस्तु ते त्रिपादूर्ध्वमित्यर्घ्यं कर्पूरवासितं तोयं मंदाकिन्याः समाहृतं आचम्य
तां जगन्नाथ मया दत्तं हि भक्तितः तस्माद्विराडित्याचमनं पंचामृतेन स्नपनं करि
ष्येऽहं सर्वसिद्धिः समायान्तु पूजिते त्वयि धातरि पयो दधि घृतं गव्यं माक्षिकं श
र्करा तथा पंचामृतेन स्नपनं गृहाण जगतः पते पंचामृतस्नानं गंगा च यमुना चैव
नर्मदा च सरस्वती तापी पयोष्णी रेवा च ताभ्यः स्नानाय चाहृतं तोयमेतत्सु
खस्पर्शं स्नानीयं प्रतिगृह्यतां यत्पुरुषेणेति स्नानं पीतांबरयुगं देव सर्वकामा
र्थसिद्धये मया निवेदितं भक्त्या गृहाण सुरसत्तम तं यज्ञमिति वस्त्रं दामोदर न
मस्तेऽस्तु त्राहि मां भवसागरात् ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम तस्माद्यज्ञा
दिति यज्ञोपवीतं कस्तूरीकुंकुमोपेतं कर्पूरेण समन्वितं गंधं दास्यामि देवेश त्र
ं ताय नमो नमः इति तस्माद्यज्ञात्सर्वहुत ऋचः इति गंधः अक्षताश्च सुरश्रेष्ठ
कुंकुमाक्ताः सुशोभनाः वासुदेव जगन्नाथ प्रीत्या मे स्वीकुरु प्रभो अक्षताः

व्र०
२५८

णाधिपतये नमः संसारगह्वरगुहासु सुखं विहर्तुं वांछंति ये कुरुकुलोद्भवशुद्धसत्वाः
संपूज्य च त्रिभुवनेशमनंतदेवं बध्नंति दक्षिणकरे वरदोरकं ते अनंतसंसारम
हासमुद्रे मग्नं समभ्युद्धर वासुदेव अनंतरूपेण नियोजय स्व अनंतसूत्रा
य नमो नमस्ते दोरकबंधनमंत्रः जीर्णदोरकं पूर्ववत्संपूज्य विसर्जयेत् न्यू
नातिरिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि क्षम्याणि चैतानि
मम दत्तमस्व प्रयाहि तुष्टः पुनरागमाय इति पूजा दानाच्च विष्णुर्भगवाननंतः
प्रतिगृहीता च स एव विष्णुः तस्मात्त्वया सर्वमिदं ततं च प्रसीद देवेश वरान्दद
स्व प्रतिगृह्ण द्विजश्रेष्ठ अनंतफलदायक त्वत्प्रसादादहं विप्र मुच्येयं कर्मबंध
नात् पक्वान्नफलसंयुक्तं सघृतं दक्षिणान्वितं द्विजवर्याय दास्यामि व्रतसं
पूर्तिहेतवे मंत्रः अनंतः प्रतिगृह्णाति अनंतो वै ददाति च अनंतस्तारको

राम
२५८

न्नति नाम्याऽऽस्रासीदिति फलं पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं कर्पूरादिस
मायुक्तं तांबूलं प्रतिगृह्यताम् सप्तास्यासन्निति तांबूलं हिरण्यगर्भगर्भस्थं हेम
बीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छमे यज्ञेनेति दक्षिणा पंच
वर्त्तिसमायुक्तं सर्वमंगलदायकं नीराजनं निरीक्षस्व अनंताय नमो नमः इति
नीराजनं मालतीमल्लिकापुष्पैर्नानाचंपकसंयुतैः पुष्पांजलिं गृहाणेमां मया
दत्तां जगुणार्पितां विष्णुमंत्रैः पुष्पांजलिः अनंतकामान्मे देहि सर्वकामफल
प्रद अनंताय नमस्तुभ्यं पुत्रं पौत्रं प्रवर्द्धय अनंतः सर्वकामानामधिपः सर्वका
मदः व्रतेनानेन संतुष्टो भवत्विह सदा मम नमस्ते देवदेवेशा नमस्ते धरणीधर
नमस्ते कमलाकांत नमस्ते सुमरप्रिय नमस्ते सर्वभूतेशा वासुदेव नमोस्तु ते
प्रार्थना अनंताय नमस्तुभ्यं सहस्रशीर्ष नमो नमः नमोस्तु पद्मनाभाय ग

वसुदेवकुलोद्भवं अनंतं विद्धि मां पार्थ ।

धार्थाय साधूनां पालनाय च । अनादिमध्यपर्यंतं कृष्णं विष्णुं हरिं शिवं । वैकुंठं भास्करं सोमं सर्वव्यापिनमीश्वरं । विश्वरूपं महाकालं सृष्टिसंहारकारकं । प्रत्ययार्थं मया रूपं फाल्गुनाय प्रदर्शितं । पूर्वमेवं महाबाहो योगिध्येयमनुत्तमं । विश्वरूपमनंतं च यस्मिन्निंद्राश्चतुर्दश । वसवोऽष्टौ द्वादशादित्या रुद्रा एकादशैव तु । सप्तर्षयः समुद्राश्च पर्वताः सरितो द्रुमाः । नक्षत्राणि दिशो भूमिः पातालं भूर्भुवादिकं । मा कुरु त्वात्र संदेहं सोऽहं पार्थ न संशयः ॥ युधि० अनंतव्रतमाहात्म्यं विधिं च वद तावर । किं पुण्यं किं फलं चास्य अनंतस्य नव तान्वृणां । केन चादौ पुरा चीर्णं मर्त्ये केन प्रकाशितं । एवं सविस्तरं कृत्वा वदानंतव्रतं मम ॥ श्रीकृष्ण० आसीत्पुरा कृतयुगे सुमंतुर्नाम वै द्विजः । वसिष्ठगोत्रे चोत्पन्नां सुरूपां स भृगोः सुतां । दीक्षानाम्नीं चोपयेमे वेदोक्तविधिना नृप । तस्याः कालेन संजाता दुहितानंतलक्षणा । शीला नाम सुशीला सा वर्द्धते पितृवेश्मनि । माता च तस्याः का

अ०
२५

राम
२५

65

वाभ्यामनंतायनमोनमः इतिवायनदानं अथकथा युधिष्ठिरउवाच अहंदुःखीहसंजातोभ्रातृभिः
परिवारितः कथंमुक्तिर्भवेदस्माकमनंताद्दुःखसागरात् कंदेवंपूजयित्वावैप्राप्स्यामोराज्यमु
त्तमम् अथवाकिंव्रतंकृत्वात्वत्प्रसादाद्भवीहिनः श्रीकृष्णउवाच अनंतव्रतमस्त्यन्यत्ति
ष्ठावस्यामनंतमं सर्वपापहरंनृणांस्त्रीणामपियुधिष्ठिर शुक्लपक्षेचतुर्दश्यांमासि
भाद्रपदेभवेत् तस्यानुष्ठानमात्रेण सर्वपापंव्यपोहति युधि० कृष्णकोयमनंतेति
यस्त्वयाशेच्यतेविभो किंशेषनागआहोस्विदनंतस्तक्षकःस्मृतः परमात्माथवा
नंतउताहोब्रह्मगीयते कएषोनंतसंज्ञोवैतथ्यंमेब्रूहिकेशव कृष्ण० अनंतइत्यहं
पार्थममरूपंनिबोधतत् आदित्यादिग्रहात्मायोयःकालउपपद्यते लवकाष्ठमु
हूर्त्तादिदिनरात्रिशरीरवान् पक्षमासर्तुवर्षाणियुगकालव्यवस्थया योयंकालोम
यास्व्यातःसोनंतइतिकीर्त्यते सोहंकालोवतीर्णोत्रभूभारोत्तारणायच दानवानांव

वृ०
२६६

म्यतामिति भोज्यावशिष्टचूर्णेन पाथेयं न चकार सा कौण्डिन्योपि विवाह्यैनां पथि गच्छन् शनैः
शनैः शीलां समं तादादायन वोढां गोरथेन हि मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरि
त्तटे ददर्श शीला सा स्त्रीणां समूहं रक्तवाससं चतुर्द्दश्यामर्च्चयंतं भक्त्या देवं जनार्द्द
नं उपगम्य शनैः शीला पप्रच्छ स्त्रीकदंबकं आर्य्याः किमेतन् कृतं किंनामव्रतमीदृशं मे
ताः कुर्वयोषितस्तां तु शीलां शीलविभूषणां अनंतव्रतमेतद्धि व्रतेनेनंतः प्रपूज्यते सा
ब्रवीदहमप्येतत्करिष्ये व्रतमुत्तमं विधानं कीदृशं तत्र किं दानं कोत्र पूज्यते स्त्रिय
ऊचुः शीले सदन्नप्रस्थस्य पुन्नाम्ना संस्कृतस्य च अर्धं विप्राय दातव्यमर्द्ध
मात्मनि भोजनं शक्त्या च दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः कर्त्तव्यं च सरित्तीरे विधि
नानेन मानिनि स्नात्वानंतं समभ्यर्च्य मंडले धूपदीपकैः पुष्पैर्गंधैश्च नैवेद्यैः पीतर
क्तैश्च तंतुः सप्तैः चतुःसमं परिभाषायां ज्ञेयं तस्याग्रतो दृढं सूत्रं कुंकुमाक्तं सुदोरकं

राम
२६६

लेनज्वरदाहेनपीडिता विननाशनदीतीरेययौस्वर्गंपतिव्रता सुमंतुस्तुततोन्यांवेधर्मपुंसः
सुतांपुनः उपयेमेविधानेनदुःशीलांनामनामतः दुःशीलाकर्कशाचंडीनित्यंकलहका
रिणी सापिशीलापितुर्गेहेगृहार्चनपराबभौ कुड्यस्तंभतुलाधारदेहलीतोरणादिषु
वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः स्वस्तिकैःशंखपद्मैश्चअर्चयंतीपुनःपुनः त
तःका लेवहुतिथेकौमारवशवर्त्तिनी पित्रादृष्टातदातेनस्त्रीचिन्हायौवनेस्थिता क
स्मैदेयामयाशीलाविचार्येतिसुदुःखितः एतस्मिन्नेवकालेतुमुनिर्वेदविदांवरः कन्या
र्थीचागतःश्रीमान्कौडिन्योमुनिसत्तमः उवाचरूपसंपन्नांत्वदीयांतनयांवृणे
पितादददौद्विजेंद्रायकौडिन्यायशुभेदिने गृह्योक्तविधिनापार्थविवाहमकरोत्तदा
निर्वर्त्यौद्वाहिकंसर्वंप्रोक्तवान्कर्कशांद्विजः किंचिद्दायादिकंदेयंजामातुःपरितो
षकं तच्छ्रुत्वाकर्कशाक्रुद्धाप्रोत्सार्यगृहमंडनं पिडायांसुस्थिरंवध्वास्वगृहंग॰
पितवेश्रमनितायसौ

व्र०
२६०

त्रिमूढेन जल्पता पापकारिणा क्षिप्तोऽथ ज्वालाकुलेवह्नौ हाहाकृत्वा प्रधावती शीलागृहीत्वा
तत्सूत्रं क्षीरमध्ये समाक्षिपत् तेन कर्मविपाकेन साश्रीस्तस्य क्षयंगता गोधनं तस्करै
र्नीतं गृहं दग्धं धनं गतं यद्यथैवागतं गेहे तत्तथैव पुनर्गतं स्वजनैः कलहो नित्यं बंधुभि
स्तर्जनं तथा अनंताक्षेपदोषेण दारिद्र्यं पतितं गृहे न कश्चिद्वदते लोके तेन सार्द्धं यु
धिष्ठिर शरीरेण तु संतप्तो मनसा प्रतिदुःखितः निर्वेदं परमं प्राप्तः कौडिन्यः प्राह
तां प्रियां कौडिन्य उवाच शीले मम इदमुत्पन्नं सहसा शोककारकं येनातिदुःखेनो
त्साकं जातः सर्व धनक्षयः स्वजनैः कलहो येन न कश्चिन्मां प्रपद्यते शरीरे नित्यसं
तापः खेदश्चेतसि दारुणः ज्ञानामि दुर्नयः कोऽत्र [illegible] किं कृते सुकृतं भवेत् शीलो
वाच प्रत्युवाचाथ तं शीला सुशीला शीलमंडना प्रायो नंतकृताक्षेपपापसंभ
वं फलं भविष्यति महाभाग तदर्थं यत्नमाचर एवमुक्तः स विप्रर्षिर्जगाम मन

राम
२६०

चतुर्दशग्रंथियुतं वामे करतले न्यसेत् अनंतसंसारमहासमुद्रे मग्नं समभ्युद्धर वासुदे
व अनंतरूपिन्विनियोजयस्व अनंतसूत्राय नमो नमस्ते अनेन दोरकं बध्वा भोक्त
व्यं स्वस्थमानसैः ध्यात्वा नारायणं देवमनंतं विश्वरूपिणं भुक्त्वा चांते व्रजेद्वेश्म मम
द्वेत्रोक्तं व्रतं तव श्रीकृष्ण० एवमाकर्ण्य राजेंद्र प्रहृष्टेनांतरात्मना सापि चक्रे व्रतं शी
लाकरे बध्वा सुदोरकं पाथेयमर्धं विप्राय दत्वा भुक्त्वा स्वयं ततः पुनर्जगाम संहृष्टा
गोरथेन स्वकं गृहं भर्त्रा सहैव शनकैः प्रत्ययस्तत्क्षणादभूत् तेनानंतव्रतेनास्या विभो
गोधनसंकुलं गृहाश्रमं श्रिया जुष्टं धनधान्यसमन्वितं आकुलं व्याकुलं रम्यं स
वेत्रातिथिपूजनैः सापि माणिक्यकांचीभिर्युक्ता हारैर्विभूषिता दिव्यांगवस्त्रसंछ
न्ना सावित्री प्रतिमाभवत् कदाचिदुपविष्टाया दृष्टो वद्धः सुदोरकः शीलाया हस्त०
मूले तु भर्त्रा तेन द्विजात्मना श्रीमदांधेन कौरव्य सा देयं त्रोटितैस्तया कोनंतइ

व्र०
२६८

ध्यं अन्योन्यजलकल्लोलैर्वीचि पर्यंतसंगमं छन्नंकिंजल्ककल्हारकमलोत्पलमं
डितं सेवितंभ्रमरैर्हंसैश्चक्रैः कारंडवैर्वकैः तेचापश्यद्द्विजोनंतोभवश्चाप्युपल
क्षितः ऊचतुस्तौद्विजश्रेष्ठ स्नानंतोवीक्षितोद्विज दृष्टश्चाप्यवनेतास्मिन्नादृष्टं मंकुंड
रंतया तावद्युक्तौद्विजेनेत्थं नेतिताभ्यांनिवेदितं एवंसपृच्छन्नष्टाशास्तत्रैवनि
षसादह कौडिन्योविकलीभूतोनिराशोजीवतेनृप दीर्घमुष्णं च निःश्वस्यपापान्
मृविभारते प्राप्यसंज्ञामनंतेतिजल्पन्नुत्थायसद्विजः नूनंत्यक्ष्याम्यहंप्राणानिति
संकल्प्यचेतसि उत्थायाप्यगृध्यवृक्षेस्मिंस्तावद्भरतसत्तम कृपयानंतदेवोपिप्रत्यक्षः
समजायत वृद्धब्राह्मणरूपेण इतएहीत्युवाचतं प्रगृह्यदक्षिणेपाणौगुहायां
प्र विवेशपत्तं स्वांपुरींदर्शयामासदिव्यनारीनरैर्युतां तस्यांनिविष्टमात्मानंदि
व्यसिंहासनेशुभे पार्श्वस्यशंखचक्रौगदागरुडशोभितं दर्शयामासविप्राय

राम
२५

१३४

साहरिं निर्वेदान्निर्जगामाथ कौडिन्यः प्रयतोवनं तपसे कृतसंकल्पोवायुमदोद्विजोत्तमः
मनसाध्यायचानंतं क्वद्रक्ष्यामिचतंविभुं यस्यप्रसादात्संजातमाक्षेपान्निधनंगतंध
नादिकंममातीवमुखदुःखप्रदायकं एवंसंचिंतयन्सोथवभ्रामविजनेवने तत्राप
श्यन्महाचूतंपुष्पितंफलितंतथा वर्जितंपक्षिसंघातैः कीटकोटिवृतंतथा तमपृ
छत्त्वयानंतः क्वचिद्दृष्टोमहातरो ब्रूहिसौम्यममातीवदुःखंचेतसिवर्त्तते सोब्रवी
द्दृष्टनानंतं क्वचित्दृक्ष्यामिवाद्विज एवंनिराकृतस्तेनसजगामाथदुःखितः क्वद्र
क्ष्यामीतिसगछन्गामपश्यत्सवत्सकां तृणमध्येप्रधावंतीमितश्चेतश्चपांडव अ
ब्रवीद्धेनुके ब्रूहियद्यनंतस्त्वयेक्षितः साचोवाचकौडिन्यंनानंतंवेद्म्यहंद्विज त
तोव्रजन्ददर्शाग्रेवृषंशाद्वलसंस्थितं दृष्ट्वापप्रछगोस्वामिन्ननानंतोवीक्षितस्त्व
या गोवृषस्तमुवाचेदंनानंतोवीक्षितोमया ततोव्रजन्ददर्शाग्रेरम्यंपुष्करिणी

व्रं०
२८९

भुक्त्वा भोगान्यथेप्सितान् अंते च स्मरणं प्राप्य मामुपेष्यत्यसंशयं अनंतं च तेनवरं दत्त्वा सर्वलो
कोपकारकं इदमाख्यानकवरं शीलानंतव्रतादिकं पठिष्यति य स्तु कुर्वन्व्रतमिदं श्र
मं सोऽचिरात्पापनिर्मुक्तः प्राप्नोति परमां गतिं गच्छ विप्र गृहं शी× नरो×घ्रं यथायेनागतो
ह्यसि कौंडिन्य उवाच स्वामिन्पृच्छामि ते ब्रूहि किं चित्कौतूहलं मया अरण्ये भ्रमता दृ
ष्टं नतद्वद्भिज जगद्गुरो स चूतवृक्षः कस्तत्र का गौः को वृषभस्तथा कमलोत्पलक
ह्लारैः शोभितं सुमनोहरं मया दृष्टं महारण्ये किं तत्पुष्करिणीद्वयं कः खरः कुंज
रः को वा कोऽसौ वृद्धो द्विजोत्तमः अनंत उवाच स चूतवृक्षो विप्रोऽसौ विद्यावेदवि
शारदः सोऽर्थिनोऽपि च विद्यादानं शिष्येभ्यस्तत्कृतं न गतः सा गौर्वसुंधरा दृष्टा सफलापि
त्वया द्विज वृषो ध× न×र्मस्त्वया दृष्टः शाद्वलं सत्यमाश्रितः धर्माधर्मव्यवस्था
नं तच्च पुष्करिणीद्वयं ब्राह्मण्यौ के चिद्भगिन्यौ तौ परस्परं धर्मादिकं तयोः
किंचित्तन्निवेदयतो मिथः विप्रायन कश्चिद्दत्तमतिथ्यो दुर्बले पिवा भिक्षाप

राम
२८९

13

स्वीयरूपमनंतकं विभूतिभेदैश्चानंतैरनंततममितौजसं तं दृष्ट्वा तादृशं रूपमनंततम
पराजितं वेपमानोजगादेदं द्विजयश्च्छ्रद्दपुरःसरं पापोहं पापकर्माहं पापात्मापाप
संभवः त्राहिमां पुंडरीकाक्ष सर्वपापहरोभव तच्छ्रुत्वानंतदेवेशः प्रहस्यास्निग्ध
यागिरा माभैस्त्वं ब्रूहिविप्रेंद्र यत्तेमनसिवर्त्तते कौंडिन्यउवाच मयाभूत्यावलिप्तेन
त्रोटितोनंतदोरकः तेनपापविपाकेन भूतिमेप्रलयंगता स्वजनैः कलहोगेहेन
कश्चिन्मांप्रभाषते निर्वेदाद्भ्रमतोरण्येनंतदर्शनकांक्षया कृपयादेवदेवेशात्व
यात्मासंप्रदर्शितः तस्यपापस्यमेशांतिं काष्ठ्यद्य कुरु महेश्वर श्रीकृष्णउवाच
तच्छ्रुत्वानंतदेवस्तमुवाचद्विजसत्तमं भक्त्यासंतोषितोदेवः किंनदद्याद्युधिष्ठिर
अनंतउवाच स्वगृहं गच्छ कौंडिन्यमाविलंवंकरिष्यसि चरानंतव्रतं भक्त्यान
ववर्षाणिपंचच सर्वपापविनिर्मुक्तो गामाप्स्यसे सिद्धिमुत्तमां पुत्रपौत्रंसमुत्पाद्य

व्रं०
२३०

परममद्भुतं उद्यापनविधिं ब्रूहि अनंतव्रतस्य केशव उद्यापनविधिं हित्वा न व्रतस्य फलं लभेत् तस्माद्यथा तथा कुर्याद्वित्तशाठ्यं विवर्जयेत् श्रीकृष्ण उवाच मासि भाद्रपदे शुक्ले परिपूर्णे व्रते ततः शुक्लायां च चतुर्दश्यां ब्रह्मचारी व्रती ततः एकभक्तेन नियमं कृत्वा भक्तिसमन्वितः स्नात्वा नद्यां देवखाते तीर्थे प्रस्रवणे तथा सर्वौषध्यैः सर्वगंधैः सिलकल्कैः रथाम्लकैः वेदोक्तविधिना सम्यक् तर्पयेत् पितृदेवताः ततो गृहं समागत्य वेदिं कृत्वा तु शोभनां तत्र मंडलकं कुर्यात् पंचवर्णैः सुशोभनैः नवनाभं सुसंपूर्णं सर्वतोभद्रमेव वा तस्योपरि न्यसेत् कुंभमव्रणं सुनवं x पे x दृढं ताम्रपात्रसमायुक्तं पंचरत्नसमन्वितं सुवर्णेन रकं चतुर्दशांग्रथियुतमाह माषकेण सुवर्णस्य तदर्द्धेनापि वा पार्थिव कृत्वानंतं प्रयत्नेन ताम्रपात्रोपरि न्यसेत् सुवर्णप्रतिमामाह शय्यां सुविस्तरां कृत्वा तत्रानंतं न्यसेद्बुती न लक्ष्यायुतं वासुदेवं कुशलेन चकुंभस्य ताम्रपात्रोपरि सुवर्णनिर्मितं शय्योपरि त्वथो लक्ष्मत्रमयमनंतपूजये

ढलेन राम
२३०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तानवार्धिमध्यस्तेनपापेनकर्मणा वीचिकल्लोलमालाभिर्गच्छन्तस्तेपरस्परं स्वरःकौ
धस्त्वयादृष्टः कुंजरोमदउच्यते ब्राह्मणोसावनंतोहंत्तासंसारगह्वरं इत्युक्त्वा
देवदेवेशस्तत्रैवांतरधीयत स्वप्नप्रायंसतदृष्ट्वानंतः स्वगृहमागतः कृत्वानं
तव्रतंसम्यक्नववर्षाणिपंचच भुक्त्वासर्वेमनं तेनयथोक्तंपांडुनंदन अंतेवस्मरणं
प्राप्यगतोनंतपुरंद्विजः तथात्वमपिराजर्षेकथांश्रुत्वाव्रतंकुरु प्राप्स्यसेचिंतितंसर्व
मनंतस्यवचोयथा यदब्दैश्चतुर्दशैर्वर्षफलंप्राप्तंद्विजन्मना वर्षैकेनतदाप्नोति कृत्वो
पाख्यानकव्रतं एतत्तेकथितंभूपव्रतानामुत्तमंव्रतं यत्कृत्वासर्वपापेभ्योमुच्यतेना
त्रसंशयः येपिशृण्वंतिसततंपठ्यमानंपठंतिये तेपिपापविनिर्मुक्ताः प्राप्स्यंतिचह
रेःपुरं संसारगह्वरगुहासुसुखंविहर्तुंवांछंतियेकुरुकुलोद्भवशुद्धसत्वाः संपूज्य
चत्रिभुवनेशमनंतदेवंबध्नंतिदक्षिणकरेवरदोरकंते इतिश्रीभविष्योत्तरपुरा
णेअनंतव्रतकथा अथोद्यापनविधिः युधिष्ठिरउवाच देवदेवसमासेनव्रते

कु०
२२१

वनस्पतिरसोदिव्यो गंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां धू
पः आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया दीपं गृहाण देवेश त्रैलोक्यतिमिरापहं
दीपः अन्नं चतुर्विधं स्वादु भूतानां जीवनं परं नैवेद्यं मया दत्तं देव श्रीत्वा प्रगृह्यतां
नैवेद्यं पूगीफलं सपत्रं च कर्पूरं सुमनोहरं पवित्रीकृतमत्यंनतां बूलं प्रतिगृह्यतां
तांबूलं एवं पूजां ततः कृत्वा गच्छेत्कुंडसमीपतः लक्षणोक्तविधानेन कृत्वाग्निस्था
पनं बुधः आरभेत ततो होमममस्यस्य समिधैस्तिलैः व्रीहिभिर्मिश्रितैश्चापि घृतेन
तु विधानतः अष्टसहस्रकेन जुहुयात्ततो देवेति वा पुनः इदं विष्णुर्विचक्रमे त्रेधा
निदधे इति शतमष्टोत्तरं यावत्प्रत्येकं जुहुयात् ऋतुः चरुहोमस्ततः कार्यो मंत्रैरे
तैर्विचक्षणैः अनंताय च कालाय अहोराात्राय वै नमः अर्द्धमासाय मासाय ऋ
तुभ्यश्च तथा पुनः संवत्सराय स्वाहेति जुहुयात् ऋतुरित्यस्याग्रे सर्वं कृत्वेत्यादिवि

जुहुयाद्व्याहृतीस्ततः स्विष्टकृत्प्रभृतीन् कृत्वा गृहोक्तेन
विधानेन [illegible] ४१

राम
२२१

दित्यर्थः इति केचित् तन्न लक्ष्याणुत मित्यादेर संगतेः आचार्यं पूजयित्वा च वस्त्रेण भर
णे नाथ कर्णांगुलि पवित्रैश्च भक्त्या च सुसमाहितः ततस्तु पूजयेद्देव मनंतं विश्वरू
पिणं वस्त्रयुग्मं शुचिर्यस्माद्वासुदेवस्य वल्लभं अनंतः प्रीयतां तेन पीतवस्त्रेण मे
सदा वस्त्रयुग्मं समाच्छन्नं पीतयज्ञोपवीतिनं चंदनेन सुगंधेन कर्पूरागरु मि
श्रितेण लेपयेत्तत वांगानि प्रीयतां मधुसूदनः गंधः पुनः पुष्पाणि संगृह्य पूज
येन्नामभिः पृथक् अनंताय नमः पादौ गुल्फौ संकर्षणाय च कालात्मने च जानु
भ्यां जघने विश्वरूपिणे कटिं वै विश्वरूपाय मेढ्रं वै विश्वरूपिणे नाभ्यां तु पद्मना
भाय हृदये परमात्मने कंठं श्रीकंठनाथाय वाहू सर्वास्त्रधारिणे वाचस्पतेनम
स्तुभ्यं मुखे संपूजयेद्धरिं ललाटे केशवायेति शिरः सर्वात्मने नमः लोकात्मास
वेमूर्त्तात्मा निमेष त्रुटि संभवः जन्म मृत्यु जरा व्याधि संसार भय नाशनः

व्रु० २७२

रभूषणैः मंत्रैः संपूज्य विधिवद्धेनुं दद्यात्प्रयत्नतः सुरभी वैष्णवी माता नित्यं विष्णुप
देस्थिता ॥ ग्रासं गृहाण मया दत्तं गोमातस्त्वं तु मर्हसि गावो ममाग्रतः संतु गा
वो मे संतु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहम् मंत्रेणानेन संपूज्य
आचार्याय निवेदयेत् गोदानस्य विधानार्थं दद्यात्स्वर्णं यथाविधि अनंतप
रिवारं च आचार्याय निवेदयेत् तत आमंत्रितान्विप्रान्पूर्वैर्दुग्धश्चतुर्दश वस्त्रो
पवीतैः संपूज्य भोजयेदन्नविस्तरैः ततस्तु दक्षिणां तेभ्यो वित्तशाठ्यविवर्जितः
स्वशक्त्या दक्षिणां दद्यादाचार्याय समापयेत् क्रियाहीनं भक्तिहीनं द्रव्यहीनं
तथैव च मंत्रहीनं पठेत्यस्माद्भवतः संपूर्णितहेतवे दीनानाथकृपणेभ्यश्च दद्याच्चै
व तथाधनं ततः द्विजैः समस्तैश्च पुत्रमंत्रं वधिवां धवैः पाथेयमन्नं भोक्तव्यं कृ

राम २७२

यथाक्रममभिव्यंतं पाठः सर्वं कृत्वा विधानेन मंत्रैरेतैर्विचक्षणः एतैर्वेदप्रमाणैश्च मंत्रैर्जुहु
यादित्यनुवर्त्तः अनंताय स्वाहा कालाय० अहोरात्राय० अर्द्धमासाय० मासाय०
ऋतुभ्यः० संवत्सराय० ततो महाव्याहृतयः सर्वप्रायश्चित्तं च दक्षिणा ग्राज्यपति
लैः स्विष्टकृतं प्रजापतिभ्यो जुहुयात् ततो वैलोकपालांश्च ग्रहान् पूजयेद्यथाक्र
मं गीतवादित्रनिनदैः कृत्वा पूर्णाहुतिं व्रती पुराणश्रवणे सद्द्विजाविशेषं नयेद्व्र
एव ती तेन सत्रोहोमः प्रभातसमये स्नात्वा कृतकृत्यः कृताह्निकः कंचिद्द्विजमादिपुस्त
णश्रव केपुराणे विदितं तत्श्लोकस्थाने पुराणश्रवणं कृत्वा कृतमध्याह्निकक्रियः
त्यर्थमेवपठितं न तावत्रात्रौ न भवतीति पूर्वोक्तेन विधानेन पूजयेद्विश्वरू
पिणं पूजयित्वा हरिं देवमाचार्यं पूजयेत्ततः परिधाय सपत्नीकं वस्त्रालंका

ततः ४ होमो ४२

न्वा मानंतमव्यये आचम्य च शुचिर्भूत्वा चिंत्यो विष्णुरनंतदिने एवं कृतेन पवित्रे
ष्टकर्मण्यात्मजनार्दनः अनंतं भगवंतं तुष्टो भवति सर्वदा व्रतस्य फलमाप्नो
ति विष्णुलोके महीयते इति हेमाद्रौ भविष्योत्तरे सोद्यापनमनंतव्रतं अथ
हेमाद्रिमदनरत्नलिखितं भविष्यपुराणानुयायी अनंतव्रतोद्यापनप्रयो
गः व्रतग्रहणादिनावधिकचतुर्दशवर्षसमाप्तिदिने त्रयोदश्यां कृतैकभ
क्तस्तत्र भाद्रशुक्लचतुर्दश्यां ब्रह्मचर्योपवासनियममनुनीय यथासंभव
पुण्यतीर्थोदे सर्वौषधसर्वगंधतिलकल्कामलकैः स्नात्वा स्नानांगत
र्पणं कृत्वा गृहमागत्य मध्यान्हे वा देवं कृत्वा तत्र नवनाभं सर्वतोभद्रं वा आ
लिख्य पंचवर्णैर्यथावत्परिपूर्णपवित्रपाणिराचम्य मासपक्षाद्युल्लिख्य
चरितानंतव्रतपरिपूर्णतार्थं तद्व्रतांगमुद्यापनमहं करिष्ये इति संकल्प्य